युक्तमत आह आश्रितत्वमिति समवायसंबंधेन सर्वाधारतानियामक
कालिकसंबंधातिरिक्तसंबंधेन विशेषणतयेति कालिकविशेषणता
येत्यर्थः अत्र नित्यद्रव्यातिरिक्तत्वं लक्षणतावच्छेदकं नैव संयोगेन परमा
णेराधेयत्वेः परमाणोर्वृत्तिव्याप्तिः तत्संयोगस्याधेयत्वानियामकत्वादित्यपि
त्यादीनां नवानां त्विति मूलस्य तु शब्देन सूचितमर्थं प्रकटयति इदानीमि
ति ननु धात्वर्थः क्रियानत्रातिप्रसंग अत आह कर्मवत्त्वमिति दिक्कृतयोः
परत्वापरत्वयोर्हेतुरिदमस्मात्संनिकृष्टं विप्रकृष्टं वा बुद्धिः कालकृतयोः प
रत्वापरत्वयोर्हेतुरयमस्मादल्पतरकालसंबंध इत्यपेक्षा बुद्धिः अथ यत्र नोत्पन्ना
तत्र परत्वापरत्वयोरनुत्पादादव्याप्तिमाशंक्य निरस्यति नवेत्यादिना

उ॰
५५

वैकालान्वयव्यतिरेकशालित्वमित्युक्तं तदयुक्तं आत्मादौ ज्ञानत्वादिकारणे
प्रागभावरूपव्यतिरेकासंभवेनाव्याप्तेः इतिकारणविवरणे मूलेगुणा
कर्म्ममात्रवृत्त्यसमवायिकारणत्वमित्युक्तं तदयुक्तं आत्मविशेषगुणेष्व
व्याप्तेरतो वैधर्म्यपरतया मूलं व्याचष्टे असमवायिकारणत्वमिति साधर्म्य
प्रकरणे वैधर्म्यप्रकरणमयुक्तमित्याशंक्याह अथवेति सत्ताभिन्नद्रव्यत्व
जातिमति द्रव्येऽतिव्याप्तिवारणाय वृत्त्यंतम् तत्रैव सत्ताजातिमादायातिव्या
प्तिवारणाय सत्ताभिन्नेति तत्रैव द्रव्यगुणान्यतरत्वरूपधर्ममादायातिव्याप्ति
वारणाय जातीति वृत्तित्वं जातिमत्त्वं च समवायसंबंधेन विवक्षितं तेन गु
णादौ द्रव्यत्वस्य कालिकेन वृत्तित्वात् द्रव्यस्य च कालिकेन गुणत्ववत्त्वम
त्वाद्द्रव्येऽनातिव्याप्तिः ननु गगनादिकं सर्वेषैवालौत्यादिव्यवहारान्नित्य

हिं॰
नं॰
५८

णासत्वेनतत्कार्यव्यतिरेकोयद्व्यतिरेकात् नेतावश्यपल्लम्भेन नियतपूर्वव
र्त्तिनान्यथासिद्धत्वज्ञानात् नव्याप्तकारणत्वस्यान्यथासिद्धनियतपूर्व
वर्त्तितावच्छेदकधर्मवत्वेप्रतिबंधकाभावस्यतत्तद्व्यक्तित्वेनहेतुतापत्तेः
यत्रनकारणत्वस्यव्यवहारस्तत्रभेदकूटवत्वेनसर्वत्रैवज्ञेयं तत्तद्व्यक्ति
भेदकूटवत्वसंबंधेनकार्यविशिष्टोयोधर्मस्तत्वंनदित्यपिनयुक्तं तस्यतदे
हात् तस्मात्कारणत्वंपदार्थांतरमेवेत्याहुः तदसत् कारणत्वस्यातिरिक्त
त्वेदंडादौसवदानत्वसत्तापत्तेः नवान्यथासिद्धत्वेसतीत्यादिधर्मस्तत्र
नकश्यमवाच्यं ताहृशधर्मज्ञानस्यावश्यकत्वेनतस्यैवकारणतायहृष्टप
त्वोचित्यात् अस्तु वादंडत्वादिकमेवकारणत्वघटादिकार्यसंबंधितया
तत्तुहेतुःनतुकधर्मस्यावंजकत्वादिति यत्तुकार्यान्वयव्यतिरेककालष्

ॐ॰
५८

सभादेर्वारणतायानियतत्वादि नचानियतरासभादेः पंचमान्यथासिद्धत्वान्नैवं
व्वारणेनियतपदंव्यर्थमितिवाच्यं अवश्यक्लृप्तत्वस्यैकस्याभावेनयत्रप्र
माणिकानांव्यवहारस्तद्भेदस्यनिवेशनीयतयानियतपदेनैवरासभादेर्वार
णात्तद्भेदस्याप्रवेशादित्यभिप्रायात् पूर्ववर्त्तित्वंचाव्यवहितपूर्ववर्तित्वंतेनव्य
वहितपूर्ववर्त्तिनोव्युदासः अतएवयागादेः स्वर्गकारणत्वानुपपत्त्याःपूर्वक
ल्पनयाऽपूर्वसंबंधेनाव्यवहितपूर्ववर्तित्वोपपादनंग्रंथकृतांसंगच्छते अन्य
थायागस्यापिनियतपूर्ववर्त्तित्वाबाधेनाऽपूर्वकल्पनेनस्यादिति नचैतादृश
स्यकारणत्वेव्यतिरेकव्यभिचारज्ञानस्यनियमांशग्रहेग्राह्याभावावगाहितया
विरोधित्वेप्यन्वयव्यभिचारग्रहस्यकथंकारणताग्रहविरोधित्वमितिवाच्यं अन्य
थासिद्धिमेव्याघन्यथासिद्धिज्ञानप्रयोजनत्वात् तद्भिन्नत्वेसतिनियतकार्यकार

दि॰ म॰ प॰ ८०

महत्त्वतत्त्वपरिस्थितिकृतत्वसंबंधकृतत्वेन त्र्यणुकमनेकद्रव्यसमवेतत्वापत्त्या महत्
त्वे द्वितीयं गंधं प्रति त्र्यणुकप्रागभावापेक्षया गंधप्रागभावे गंधात्मकप्रतियोगिता
वस्त्वेन शीघ्रं तदुपस्थितिः तृतीयं दंडत्वं दंडरूपाद्यपेक्षया दंडे स्वाश्रयदंडसं
योगादिघटितपरंपरया गुरुत्वादिति ननु निबंधांतरे घनावलंबेनेह श्रूयते
तत्कथमत्रावयुपलक्षमेतिकृतमतनत्वस्य फलमाह अतएवेति अन्यथा महत्त्व
स्यानेकद्रव्यत्वान्यत्वल्प्तमानियतपूर्ववृत्तित्वाभावेन तस्यान्यथासिद्धिमहत्त्वेन
तस्यादितिभावः अत्रानेकद्रव्यत्वं नानेकद्रव्यसमवेतत्वं तस्य द्व्यणुकेपि सत्त्वे
न द्व्यणुके कार्यत्वापत्तेः समवेतसमवेतद्रव्यत्वं तद्वित्वपि न आत्मनि तस्याभा
वेनात्मप्रत्यक्षानुपपत्तेः किंत्वणुभिन्नद्रव्यत्वमिह बोध्यं अन्येषामिति दंडरूपादिका
ग्राकुलालपित्रादीनां अनेनपंचमान्यथासिद्धेन चारितार्थत्वे संग्रहः अनियतत्वा

डो॰ प॰ ८०

तावच्छेदकत्वे गौरवाद्गुणानामसार्वकालीनत्वाच्चाह ॥ २ ॥ विशेषदर्शयोर्वेति य
त्कार्यजनकं प्रतीति अत्रापि अन्यं प्रतीत्याद्यभिधानेन तृतीयचतुर्थयोः सिद्ध्या. संग्र
हफलाननुगमत्वतदनुगमत्वयोर्विशेषणत्वयोरुपादानेन तयोर्भेदेनाभिधाने
प्रयोजनाभावं सूचयितुं विशिष्य बुद्धिवैशद्यार्थं तयोरुक्तमिति अवश्यक्लृप्तमेति गंधं
प्रत्यवश्यक्लृप्तेन गंधभावेनैव गंधोत्पत्तिसंभवेन तत्सहभूतरूपप्रागभावादिः पाक
जगंधं प्रत्यन्यथासिद्धमेव यत्तज्जातीयं प्रत्यवश्यक्लृप्तमनियतपूर्ववर्त्तिभिर्दंडा
दिभिरेव घटोत्पत्तिसंभवे रासभोऽन्यथासिद्ध इत्यर्थः ननु अवश्यक्लृप्तमनियतपू
र्ववर्त्तिना पाकजरूपप्रागभावेन गंधोत्पत्तिसंभवे रूपप्रागभावेन गंधप्रागभावस्या
न्यथासिद्धिः स्यात् यत्कारणान्तरमवश्यक्लृप्तं न भिन्नं नो वा तन्मात्रजन्यः स्यादिति चे
दत्राहुः लघुनियतपूर्ववर्त्तित्वरूपमवश्यक्लृप्तत्वमिह बोध्यं लघुत्वं शरी

हि:
नं:
५८

गस्यान्यथासिद्धिः स्वर्गत्वे प्रतिपूर्ववर्त्तित्वं गृहीत्वैव तद्धेतुकारणत्वान्यथा
पपत्यायागव्यापारत्वेनापूर्वकल्पनादतोन्यं प्रतिपूर्ववर्त्तित्वघटितरूपेणयस्य
यज्जनकत्वं तस्यतेन रूपेणातेऽन्यन्यथासिद्धत्वमित्येतावत्पर्यंतं विवक्षणमा
वश्यकं यागस्यापूर्ववर्त्तित्वघटितस्वर्गजनकत्वेनापूर्वं प्रत्यन्यथासिद्धत्वेपि
यागत्वेन हेतुत्वेन्यथासिद्ध्यभावात् एवं च शब्दस्यापूर्ववर्त्तित्वघटितशब्दजनक
त्वेन गगनस्यान्यथासिद्धत्वेपि तद्घटितशब्दाश्रयत्वेन हेतुत्वेन तृतीयान्यथा
सिद्ध्यसंभव इत्यभिप्रायः शब्दाश्रयत्वाद्यद्व्यातिरिक्तद्रव्यत्वादिनागगन
स्य कुटं प्रति हेतुत्वेऽपि तृतीयैवान्यथासिद्धिः अन्यं प्रतिपूर्ववर्त्तित्वानुपया
एकं यं प्रति यस्य पूर्ववर्त्तित्वं गृहीत्वा तत्स्यपर्यानापूर्वं प्रतियागस्यान्यथासिद्धिरित्य
पि केचित् कावत्वादिकमिति विनिगमनाभावेन बहूनां वर्णानां कारण

ॐ:
५९

केवलान्वयव्यतिरेकप्रयुक्तान्वयव्यतिरेकशालित्वमित्युक्तौ प्रथमद्वितीयान्य
थासिद्ध्योः संग्रहेऽपि भेदेनान्यथासिद्धिद्वयप्रदर्शनं शिष्यबुद्धिवैशद्यार्थ
मित्यवधेयं अनन्यथेति कपालानन्तगणमनन्यथेत्यर्थः तेन न कुलाल
जनकत्वव्यर्थान्यथासिद्धाश्रयेऽतिव्याप्तिः शंकते शब्दाश्रयेति अनन्यथा
त्वादित्यत्र तृतीयान्यथासिद्ध्यभावादिति भावः एवमपीति अवश्यक्लृप्तनियतपूर्व
वर्तिनेत्यादिकोऽर्थः यद्यपि शब्दो द्रव्यजन्यो जन्यगुणत्वादित्यनुमानात्स
ककार्यकारणभावग्रहरूपानुकूलतर्कसहकारेणैव शब्दो द्रव्याश्रितो गुणत्वा
दित्यनुमानेन शब्दाश्रयत्वस्य गगने गृहीतत्वात्तेन रूपेण पटपूर्ववर्तित्वेग्रा
ह्ये तथाव शब्दपूर्ववर्तित्वं गृहीत्वैव गगनस्य घटपूर्ववर्तित्वग्रहात्तृतीयेवा
न्यथासिद्धिः संभवति तथाप्यनन्यप्रतीत्यस्य यथाश्रुतार्थकत्वे श्रुतेनया

द्वि॰
न॰
५५

न्ननिरूपितनियतपूर्ववर्तित्वग्रहविशेष्यतावच्छेदकत्वे सतितद्धर्मावच्छिन्नं
प्रतिस्वतंत्रान्वयव्यतिरेकशून्यत्वंप्रत्यन्यथासिद्धत्वंप्रथममित्यर्थः द्विती
यमन्यथासिद्धं दंडत्वादिवारणाय सत्यंतम् कपालसंयोगघटपूर्ववर्ती
त्वादिग्रहे कपालस्यापि तादृशविशेष्यतावच्छेदकत्वात्तत्रातिव्याप्ति वार
णायविशेष्यं किंतत्कारणमिति कारणत्वंवातत्रघटान्वयव्यतिरेकशा
लित्वं तेनन्नान्यथासिद्धः स्वातंत्र्येण तत्कार्यनिरूपितान्वयव्यतिरेकशून्य
त्वे सति तत्कार्यकारणावच्छिन्नस्वनिरूपिततत्कार्यनियतपूर्ववर्तित्वग्रहवि
शेष्यतायाः कपालायतत्कार्यंप्रत्यन्यथासिद्धमित्यर्थः कपालसंयोगघट
पूर्ववर्तित्वग्रहविशेष्यतायाः कपालसंयोगनिष्ठायः कपालावच्छिन्नत्वा
त्कपालसंयोगेऽतिव्याप्तिवारणाय सत्यंतम् दंडत्वादिवारणायविशेष्यं प्र

ॐ
५५

रणतावारणायतादृशान्यतरप्रत्यासत्त्यासमवायिकारणेप्रत्यासन्नत्वेसति
कारणत्वंपरित्यज्यतादृशान्यतरप्रत्यासत्त्याकारणत्वपर्यंतानुधावनं आ
त्मविशेषगुणानामसमवायित्वविशेषाभावः यत्र कार्यनाशजनकनाशप्रति
योगित्वंतत्त्वमिति तत्रादित्वनाशप्रयोजकनाशप्रतियोगित्वामर्शेनातुज्ञाव
तिव्याप्तिरिति अवयवमात्रसंयोगत्वेद्रव्यासमवायिकारणत्वमित्यादिवि
शिष्टैवलक्षणानिर्वाच्यं अखंडोपाधिरेववातदित्यन्ये निमित्तकारणमिति
अत्रेदंबोध्यम् समवायिकारणत्वासमवायिकारणत्वान्यकारणत्वमेवनि
मित्तकारणत्वंतेनतुरीपटसंयोगप्रतिनिरीतंतुसंयोगस्यासमवायिकारणत्वे
पिनतस्यपटंप्रतिनिमित्तकारणत्वहानिरिति यत्कार्यंप्रतीति यद्धर्मा
वच्छिन्नंप्रतीत्यर्थः येनरूपेणेति यद्रूपावच्छेदेनेत्यर्थः इत्थंचतद्धर्मावच्छे

सि॰
नं॰
७७

नैवोपपत्तौ तद्गतेन तन्तुसंयोगान्यतन्तुनिवेशनमनुचितमित्यपास्तं मात्रपदस्यासम
उक्तार्थकत्वात् एवमिच्छाद्यसमवायिकारणलक्षणेऽप्यात्ममात्रसमवेतत्वा
वच्छिन्नप्रतियोगिताकभेद एव निवेश्यः नतु ज्ञानत्वाद्यवच्छिन्नभेद इति बोध्यं
तथा चेति द्विविधप्रत्यासत्तिविलक्षणेत्यर्थः फलितार्थ इति द्विविधप्रत्या
सत्योरिति शेषः पर्यवसितसमवायिकारणलक्षणमाह इत्यचेति कार्यैका
र्थप्रत्यासत्तिः समवायसंबंधः कारणैकार्थप्रत्यासत्तिः समवायिसमवेतत्व
संबंधः तथा च समवायित्वसमवायिसमवेतत्वान्यतरसंबंधेन कारणत्वस
त्यात्मविशेषगुणान्यत्वं सामान्यतोऽसमवायिकारणत्वमित्यर्थः अत्रप
टासमवायिकारणस्य तंतुसंयोगस्य पटरूपासमवायिकारणस्य तंतुरूपस्य
च संग्रहाय समवायसमवेतत्वयोः प्रवेशः पटरूपं प्रति पटस्यासमवायिका ऊं॰ ७७

केचित्तु कार्यतः स्वप्रतियोगिनिष्ठासमवायिकारणतानिरूपितकालोपदायक
जन्यत्वसंबंधेननाशत्वेनहेतुता तदीतंतुसंयोगनाशनिमित्तंनत्वसमवायी
तिनतन्नाशोपटनाशइत्यन्यत्रविस्तरः वेगादीनामित्यादिनास्पर्शापरिग्रहः
अभिघातादीति आदिनानोदनपरिग्रहः ज्ञानादीत्यत्रादिनाइच्छापरिग्रहः
इच्छादीत्यत्रप्रयत्नपरिग्रहः तंतुसमवेतत्वसतितदीतंतुसंयोगाद्यन्यत्वेसति
पटकारणत्वंपटासमवायिकारणत्वमितिविशिष्टैवलक्षणंवक्तव्यमित्याह
तथापीति वस्तुतस्तुतदीतंतुसंयोगत्वावच्छिन्नप्रतियोगिताकभेदः पटासम
वायिकारणलक्षणघटकतयाग्रंथकर्तुर्नाभिप्रेतः अपितुतंतुसमवेतत्वा
वच्छिन्नप्रतियोगिताकभेदएव अन्यथाहतंतुसंयोगादिभेदानांपृथक्निवे
शापत्त्याभेदकूटनिवेशेनगौरवापत्तेरितिध्येयं एतेनतंतुमात्रसमवेतत्वनिवेशे

टि॰ नं॰ ४३

वेतत्वकालिकविशेषणतोभयसंबंधेन नाशत्वेन हेतुतेति इदं कालिकसंबं
धस्य कार्यतावच्छेदकसंबंधत्वे घटादेर्लणकत्वापत्तिरतः स्वप्रतियोगिसम
वायिसमवेतत्वानिवेशः स्वप्रतियोगिजन्यत्वसंबंधस्य दंडनाशाद्घटनाशाप
त्तेरुपेक्षितः भाविनाशमादायातिप्रसंगवारणाय कालिकसंबंधप्रवेशः यदि
वकपालपवनसंयोगनाशाद्घटनाशापत्तिरेवमपि दंडवारेति विभाव्यते तथा
स्वप्रतियोगिजन्यत्वस्वप्रतियोगिसमवायिसमवेतत्वकालिकविशेषणतै
तत्त्रितयसंबंधेन नाशकत्वेन हेतुता बोध्या नन्वेवमपि तुरीतंतुसंयोगना
शापत्तिरिति वाच्यं तुरीतंतुसंयोगस्य पटं प्रति कारणतैव किंतु तुर्येव संयो
गसंबंधेन तुरीतंतुमूलम् निष्ठामतीपटजनकेति तयातिप्रसंगाभावात्
एवं च विशेषलक्षणेषु तुरीतंतुसंयोगादिभेदानामप्रवेशेन लाघवमपीति

उं॰ ४३

मिति न चासत्त्वमिति इदं च समवायिकारणेऽतिव्याप्तिवारणाय यत्सम
वायिकारणं तत्समवेतत्वेन तत्त्वात्तावतिव्याप्तिवारणाय जनकमिति तं त्वत्तन्वे
त्वान्न व्याप्तिरिति यत्र पूर्ववर्तितया अभावेन नातिप्रसंगः कृत्स्नावल्यामव्य
यपीति चेत् तं तन्तुसंयोगस्य पटं प्रति कुतो नासमवायिकारणत्वमिति चेन्न नाशक
नीयं तदीतं तन्तुसंयोगनाशेपि पटनाशापत्तेः असमवायिकारणनाशस्य द्रव्यना
शकत्वात् न चासमवायिकारणनाशस्य द्रव्यनाशकत्वे प्रमाणाभाव इति वा
च्यं द्व्यणुकनाशान्यथानुपपत्तेरेव तत्र मानत्वमिति न च तेन तन्तुष्वविनष्टेष्वपि
नैव समवायिकारणेन तेन द्व्यणुकद्रव्यस्थितेः स्यादिति वाच्यं इष्टापत्तेः कारण
नैकत्वे गौरवात् अथ द्रव्यासमवायिनाशयोः कथं हेतुहेतुमद्भाव इति चे
दत्राहुः प्रतियोगितया द्रव्यनाशत्वावच्छिन्नं प्रति स्वप्रतियोगिसमवायिसम

दि॰ ने॰ ५२

वतितिक्तभावकार्येकसोपदायकत्वरूपस्यावार्थेलक्षणस्याव्याप्तिं परिहि
त्पसमपदलत्सपक्षोग्रथ्यक्तातेनिध्येयं कारणंमूले अन्यथासिद्धीति दंडत्वादे
र्नियतपूर्ववर्तितायाः सत्वादतिव्याप्तिरतउक्तमन्यथासिद्धिशून्यस्येति न
कुटत्वावच्छिन्नेन्यत्रक्लृमांनियतेनाघन्यथासिद्धिमत्त्वपि घटत्वावच्छिन्नेन
न्यथासिद्धिलक्षणस्मभातिव्याप्तिवारणाय नियतेति यत्समवेतमिति घट
वच्छिन्नस्वकारणतावच्छेदकयद्धर्मावच्छिन्नेसमवायसंबंधेनान्यथातेत
द्धर्मावच्छिन्नंप्रतितद्धर्मावच्छिन्नमित्यर्थः घटत्वावच्छिन्नंहि स्वकार
णतावच्छेदककपालत्वावच्छिन्नेसमवायसंबंधेनोत्पद्यतइतिघट
त्वावच्छिन्नंप्रतिकपालत्वावच्छिन्नंहिसमवायिकारणं स्वकारण
तावच्छेदकेनउक्तावनद्रव्यत्वादेर्घटादिसमवायिकारणतावच्छेदकत्व उं॰ ५२

ते नचात्रपरममहत्त्वदमात्मपरिमाणातिरिक्तपरममहत्त्वपरमिति
वाच्यं मानाभावादिति वदंति तन्मते हूस्वत्वमपि स्यादिति तस्याभो
ति आत्ममहत्त्वपरिमाणस्यापीत्यर्थः ज्ञानातिरिक्तेष्वेवेति कारणत्व
वज्ज्ञान्यधर्मेतरभावकार्यापेक्षयाऽप्यावार्ययुग्युः ज्ञानत्वधर्म्मो ज्ञानादयः
तदतिरिक्तभावकार्यंप्रति कारणत्वपारिमाण्डिल्यभिन्नानां साधर्म्य एवं
चपारिमाण्डल्यादीन्यादिपदेन परममहत्त्वं द्व्यणुकमात्राद्याणामाणुयः
चपारिमाण्डल्यस्य परममहत्त्वादीनां वज्ज्ञानातिरिक्तप्रतिनकारणत्वेन
नुकारणत्व सामान्याभावलिद्वनमतश्चभावः प्रजावार्थः पारिमाण्डल्या
नीत्यादिपदार्थेषुप्रविष्टः खोदेरजातिनाक्यविद्रूपाहिरूपादेः पाकेन
रूपपरमाणुरूपादस्यागणनात् एषामलक्ष्यत्वमतन्मन एवं चत्तेषुज्ञाना

दि·
न·
४२

यथायोग्यं स्वधर्मेणानुमितौ नाविमाण्डल्याभिन्नानामित्याद्युक्तं मतन्तेन विषय
कं प्रत्यक्षं तु विद्यमानविषयकमपीति भावः ननु ज्ञायमानसामान्यस्य
प्रत्यासत्तित्वेन ज्ञायमानहेतोश्चानुमितिकारणत्वेन याविमाण्डलिस्यामा
न्यलक्षणाजन्यज्ञानेऽनुमितौ च कारणत्वाभावाद्विमाण्डल्याभिन्नानामिति मूल
मसंगतमत आह ज्ञायमानमिति आत्ममानसमिति विषयतया द्रव्य
लौकिकप्रत्यक्षे समवायेन महत्त्वस्य हेतुत्वादिति भावः यद्यपि स्वप्रत्य
क्षस्येव त्वङ्मनुचितं तथापि लौकिकप्रत्यक्षेऽत्रात्मैकान्त्यं महत्त्वेऽपि योग्य
त्वात्मसत्त्वेन संभवतो त्वात्ममानसप्रत्यक्षे केवलं कारणत्वं वाच्यं तथा
रमांडल्यादिष्वित्यभाष्ये चाग्रादिग्रहणात्परममहत्त्वं गृह्यत इति वदता
माचार्याणामात्मपरिमाणेनापि न काचित्कारणमित्याशयोपलभ्य

गो·
४२

त्वेबाधकमाह नहीति अणुपरिमाणंहीत्यर्थः नचेति चलत्वर्थंतत्रहेतु
माह परिमाणस्येति स्वसमानजातीयेति साजात्यमणुपरिमाणविभा
जकेनबोध्यं अणुजस्येति उत्कृष्टं वाणोरणुतरमेवेतिभावः नचाणुज
न्यस्याणुतरत्वमस्तुकिंबाधकमितिवाच्यं तथासतित्रुटेरवाणुत्वप्रसं
गात् नचतर्हिद्व्यणुकादिपरिमाणस्यकिंजनकमितिबोध्यमित्येवेत्यवे
हि व्यक्तीभविष्यतिचेदमुपरिष्टात् मूलस्यन्यूनतापरिहारइतिपर्वमिति
बोध्यमित्यनेनान्वयः नकारणानीतिबोध्याइत्यर्थः ऐंद्रिकयोर्महत्त्वसा
मान्यहेविषयविषयोः स्वविषयकलौकिकप्रतिदेहेहेतुत्वान्महत्त्वान्यम
महत्त्वातींद्रियत्वेइष्टविशेषणे ननुयोगिप्रत्यक्षेविषयविधयापरिमाणस्य
स्यापिकारणत्वात्तत्परिमाणस्यापिज्ञानानामित्यायणुकेमनस्याह इहमयीति

दि. नं. ध.

परस्यकत्वमाह आकाशत्वादिकेत्विति कर्म्मवदस्यत्याकाशत्वत्रुवोपा
धिमत्याकाशेशुतिव्याप्तिवारणाययतन्पदमितिभावः जात्यादीनामव्यका
र्थसमवायसंबंधेनसामान्यवत्वात्सामान्यपरिहीनाइतिमूलमयुक्तमतो
व्याचष्टे सामान्यानधिकरणत्वमिति नचाचसामान्यनिरूपितानधिकरण
त्वेनसामान्यादौपकार्थसमवायस्याधिकरतानियामकत्वाभावादितिभा
वः अप्रसिद्धत्वात्पारिमंडलियदार्थनिर्विक्ति पारिमाडल्यमिति नहि
ज्ञानांपारिमांडलिभिन्नानां ननुद्व्यणुकपरिमाणस्यापिकारणत्वाभा
वान्नाव्याप्तिरतः पारिमाडलिपदंद्व्यणुकपरिमाणस्याप्युपलक्ष
णं नेनतस्यापिलक्ष्यत्वमित्यभिप्रायेणाह अणुपरिमाणंत्विति परमा
णुद्व्यणुकसाधारणमणुपरिमाणत्वमित्यर्थः पारिमाणल्यस्य कारण

ङं. ध.

जन्यता तदर्थं प्रदर्शयति द्रव्यगुणकर्मणामिति निर्गुणक्रियइति मूलं
तदर्थश्च गुणक्रियात्यन्ताभाववत्वं तेन गुणक्रियाऽन्योन्याभाववमास्य
द्रव्येनातिव्याप्तिः यद्यपिगुणेति ननु गुणगुणिनोर्वामदाद्विगुणोवि
धाणवत्समानकालीनत्वात्कथं गुणशून्यत्वमितिवाच्यं निर्गुणेगुणोत्प
त्तिस्वीकारेण तत्संभवात् नचैवं घटादेरपि लक्षणावच्छिन्नस्यत्वात्तघता
नस्यादितिवाच्यं इष्टापत्तेः नव्याःपीति गुणवत्ताव समवायेन तेन कालि
केन गुणवद्गुणादिष्वतेर्गुणादेरसंग्रहेपितद्वत्तिः गुणवद्दृत्तित्वंच सम
वायस्वरूपान्यसंबंधेन तेन समवायेन गुणवद्दृत्तित्वाभिधाने तादृ
शस्य द्रव्यत्वप्रकारकप्रमाविशेष्यत्वस्य द्रव्येसत्वादतिव्याप्तिरथनेनै
वनद्दतेवाच्यं तदाद्यसामान्याद्यव्याप्तिरितिपराले पदार्थविभाजक

मितिबोध्यं अत एव भाष्ये पंचानामित्युक्तं नतु पंचभावानामिति अनेकभा

दि॰ ववृत्तीत्यादि अत्र चानेकभाववृत्तित्वं स्वप्रतियोगिवृत्तित्वस्वसमानाधिकर

न॰ णोभयसंबंधेन भेदविशिष्टत्वे सति भाववृत्तित्वं तेन गुणादौ संख्यापूवह

३९ स्यानेकत्वस्याभावेपि नाव्याप्तिः भावत्वरूपतादृशधर्ममादाय समवायेति

व्याप्तिवारणाय पदार्थविभाजकोपाधिरिति उपाधिमत्ता च समवायस्वरू

पसंबंधान्यतरसंबंधेन तेन कालिकसंबंधेन ध्वंसस्य तादृशोपाधिमत्त्वे

पि न क्षतिरिति समवायेनोपाधिमत्त्वविवक्षणे तु सामान्यादाव्याप्तिः स्याद

तस्मान्नोक्तं अन्यतरघटकस्वरूपत्वकालिकसंबंधिभिन्नं ग्राह्यं तेन ध्वं

सेप्रतिव्याप्तिः अत्र च समवेतसमवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वं द्रव्या

दिचतुर्णां साधर्म्यं बोध्यं उद्देश्यतावचकपदस्य चरमनुपादानमयुक्तमतो या उ॰

३९

व: समानोधर्म: सधर्मस्तस्य भाव: साधर्म्यं एवं वैधर्म्यमित्यत्रापीति प्रम
वाम्नायबहुव्रीहिमाह समानोधर्मोयेषामिति केवलान्वयित्वादिति वि
षयभेदेन विषयताया भेदेपि ज्ञानविषयतात्वेन केवलान्वयित्वमस्त्येवेति
भाव: एवमग्रेपि ज्ञेयत्वादीत्यत्रादिपदार्थं दर्शयति एवमभिधेयत्वेति
अभिधेयत्वमभिधायामानाभावात्संकेतएवाभिधेयविषयत्वे अभिधावसंकेत
ग्राह्योधिक: पदार्थ इति मीमांसका: संकेतयत्रायामभिधायामानाभावात्सं
केतएवाभिधेयेति नैयायिका: प्रमेयत्वमित्यत्रादिनाखिलत्वपरिग्रह: नवा
कालसंबंधित्वं द्रव्यादीनां वंसां साधर्म्यं भावत्वंस्वरूपमनन्तलड्येत्यद्रव्या
दिपंचानां साधर्म्यं मूलेप्रपंचितं द्रव्यादयइत्यादिना अनेकत्वे सतिभावत्व
मिति एवं च मूले द्रव्यादय: पंचोतिडहेशापदं भावाग्रनेकेतिविधेयपदं ॥

टि॰ नं॰ ३८

नेनेत्युक्तं अतिरिक्तेति भावातिरिक्तेत्यर्थः अभावस्याधिकरणात्मकत्वेभे
देऽप्याधाराधेयभावानुपपत्तिरूपोदोषः सोप्यस्मिन्मतेनेत्याह एवंचेति
अधिकरणाधेययोः अतिरिक्तत्वेचेत्यर्थः नन्वभावाधिकरणकाभाव
भावस्याधिकरणात्मकत्वेप्याधाराधेयभावोचितस्तथासत्वेप्यस्व
तोरूपणांतरमाह एवंचेति अन्यथा अभावस्याधिकरणात्मकत्वे एतेन
वक्ष्यमाणरूपेण साधर्म्यवैधर्म्ययोगोविदायमाधवायमुकुंदायलक्ष्मी
नारायणायमधुकैटभसूदनायजगन्नाथायकायवाङ्मनोभिर्नमस्कार
णावश्री परस्यधर्मंतायज्ञानांसमस्तपदार्थानामेवपरस्परंभेदकत्वज्ञा
पयितुमाह इदानीमिति पदार्थनिरूपणानंतरमित्यर्थः तत्सनिरूपणा
ननन्यपदार्थेष्वेतितस्यतन्नपदार्थस्यसाधर्म्यंतयानिरूपणासंभवादितिभा

ॐ॰ ३८

स्तीत्याकारकप्रत्ययः तस्यसामान्यावगाहित्वात् नन्वेतादृशप्रतीतेर
न्तिमध्वंसाद्यवगाहि पूर्वापरयन्तिमध्वंसप्रागभाववर्त्तिरिक्तेऽपितादृशाका
रप्रत्ययप्रसंगात् द्वित्तिनवस्तुत्वावच्छिन्नप्रतियोगिताकत्वं ध्वंसप्रागभाव
योरप्यव्याहतिरितनोतराश्यामेरन्तेनानास्तीतिप्रत्ययः तदाध्वंसप्रागभावयोः
सामान्यावच्छिन्नप्रतियोगिताकत्वस्वीकारात् ननुपूर्वापरयन्तिमध्वंसव
तिरिक्तेतत्रतदानदनभ्युपगमादितिवाच्यं विनिगमनाविरहेणपदार्थां
तरंध्वंसप्रागभावयोरपि तत्स्वीकारप्रसंगेनगौरवात् तदपेक्षयाऽत्यंता
भावस्यानतराश्यामादौसंबद्धकसनेलाद्यवारित्यत्रविस्तरः ननुभाव
त्वकाद्विधत्वादिविभागोऽनुपपन्नः अभावएवमानाभावादित्यभिप्रायेणप्रा
भाकरःशंकते नन्विति अभावस्याधिकरणात्मकत्वेगौरवप्रदर्शयितम

हि॰ नं॰ ३२

ह यत्रतिति तथाच संबंधाभावादेवच चननयनानंतरं घटात्यंताभाववुद्धि
र्नैतिभावः कालविशेषविशिष्टस्वरूपस्य संसर्गातोपगमादेवघटवतिघटो
नास्तीतिप्रतीत्यभावो यपनोवनर्थसंसर्गाभावेमानाभावइत्यस्वारस्यं केचि
दित्यनेनसूचितं ननुमास्तुघटकालेघटात्यंताभाववुद्धिः घटोत्पत्तेः
प्राक्कालेतस्यादित्याशंक्याह अत्रेत्यादिना ननुतर्हि रक्तरूपप्रागभावाधि
करणेश्यामघटेश्यामरूपध्वंसाधिकरणेवरक्तघटेकथं रक्तोनास्तिश्यामो
नास्तीतिप्रतीतिः ध्वंसप्रागभावयोरधिकरणेऽत्यंताभावस्यासत्वादित्य
तआह श्यामघटइति तत्रैति ध्वंसप्रागभावयोरित्यर्थः अत्यंताभावेन
सहेतिशेषः तथाचनवमते पूर्वपक्षकथितशंकायामिष्टापत्तिरेवेतिभा
वः प्रकृतैवैतन्न कथमन्यथापूर्वमग्रेपिरक्तेश्यामेघटे रक्तरूपंना ऊ॰

२०

रितिवाच्यम् तथा सति स्वानधिकरणत्वं तद्रूपि चरमसंयोगाभावादेव पटोत्पत्तिवार
णसंभवे प्रागभावकल्पनानौचित्यादिति चेन्न चरमसंयोगस्य समवायत्वादिना सामाना
धिकरण्यसत्त्वात् तन्त्वाहत्य तन्त्वपि नैवं तन्तरेपि समवायेन पटोत्पत्त्यापात्तत्र समवायेन च
रमसंयोगाभावेन व्यभिचाराभावात् कालिकसंबंधेन तन्तुपटत्वावच्छिन्नप्रति चरमान्त्य
तसंयोगव्यक्तेः कालिकसंबंधेन हेतुता वाच्या तथा च स्वानधिकरणत्वं तद्रूपि
कालिकतया चरमसंयोगसत्त्वात्पटोत्पत्तिवारणाय प्रागभावहेतुत्वस्यावश्यक
त्वादिति एवमप्यन्यकल्पना निर्दिष्टाः पदार्थाः नत्वपि तस्य प्रतियोगित्वे प्रमाणा
भाव इति तत्त्वम् ध्वंसस्य लक्षणमाह प्रागभावे तिव्याप्तिवारणाय जन्येति अत्यन्त
ताभावस्य लक्षणमाह नित्येति ध्वंसादिवारणाय नित्यपदम् नन्वेवं तदभाव
स्य नित्यत्वे घटानयनानन्तरमपि भूतले घटो नास्तीति प्रतीत्यापत्तिरित्यतआ

हि॰ नं॰ २८ स्यैविरहेणैवनदापत्त्यसंभवात् नचजन्यद्रव्याभावस्यजन्यद्रव्योत्पत्तिका
लीनोत्पत्तिकध्वंसाभावस्यहेतुत्वमित्यत्रविनिगमनाविरहेणतादृशद्र
व्याभावस्यतादृशध्वंसाभावानांवकारणतामपेक्ष्यलाघवादेकएवप्राग
भावोहेतुःकल्प्यतइतिवाच्यम् प्रागभावकल्पनेऽपितत्कालोत्पत्तिका
नेनपदार्थप्रतियोगिकानामनंतानामभावानांविनिगमनाविरहेणहेतुता
याःस्वीकारत्वात् नचाचप्रागभावरूपधर्मिकल्पनागौरवंपरमित्यतिविद्यतत्कुता
दुःप्रत्यक्षंनित्वानधिकरणेषुतेतुपटोत्पत्तिवारणायसहस्रतन्तुकपटे
स्यलेवहूनांतन्तूनांतत्संयोगानांवतत्तद्व्यक्तित्वेनहेतुत्वकल्पनापेक्षयाप
कप्रागभावस्यहेतुतालघीयसी अत्रैवमपिहिविवेचतंतन्तुसहस्रेनैत
कपटोत्पत्त्यापत्तिः नचचरमसंयोगव्यक्तेःतद्व्यक्तित्वेनहेतुत्वान्नापत्ति गौ॰ २८

तादात्म्यत्वेनतादात्म्यावच्छिन्नत्वंप्रतियोगितायांविवक्षितं तेनसंयोगाव
च्छिन्नप्रतियोगिताकेसंयोगित्वंताभावेनातिव्याप्तिः प्रागभावस्यलक्षणमा
ह विनाश्यभावत्वमिति प्रध्वंसेतिव्याप्तिवारणायविनाशीति ननुप्रा
गभावसत्वेकिंमानमितिचेदत्रोत्पत्स्यघटकपालादावभयतत्सिद्धिरितिप्रा
वः केचित्तुगतोघटइतिवदुत्पन्नोघटध्वंसइतिप्रत्ययबलेननाशोतिर
क्ततेननप्रागभावः इदानींघटप्रागभावइतिलोकानांप्रत्ययाभावात् न
वतइदोपधायकतत्कपालसंयोगादौनातद्घटोत्पत्तिरितिवाच्यं अन्यद्
घत्वावच्छिन्नेत्वंतितजनककालेपिसत्वात्तन्नापिनद्घटोत्पत्त्येव्याप्तिः प्रागभा
वांगीकारेचतदभावादेवनघटनलइत्याप्तिरितिवाच्यं अन्यद्घत्वावच्छिन्न
प्रतिजनकतयाक्लृप्तसमवायसंबंधावच्छिन्नप्रतियोगिताकद्घत्वाभाव

दि॰ पित्वदेनास्तीतितुद्वौसप्रकारः अभावत्वप्रकारकप्रत्यक्षत्वप्रतियोगि
न॰ पियोहेतुत्वात् अन्यथाऽइदंतमइतिप्रतीत्यनापत्तेः नचसत्तभावतूपस्याभा
३५ वत्वात्पर्यास्यितस्यप्रकारत्वेविशेषणपियोहेतुत्वेव्यभिचारइतिवाच्यं विशे
षणाभेदेनहेतुतायाभिन्नत्वेनतत्वतद्धेतुत्वानपगमात् फलानुरोधित्वात्
त्वासत्तायाइतिप्राहुः संसर्गान्योन्याभावभेदतइतिमूलादेकः संसर्गाख्याप
रोन्योन्याभावाख्यइतिप्रतीयते नचाप्युक्तं संसर्गस्याभावत्वानंगीकारादित्य
तआह संसर्गाभावेति तथाचद्वंद्वात्पदंश्रूयमाणस्याभावपदस्यप्रत्येकम
भिसंबंधात् संसर्गाभावोन्योन्याभावश्चेतिमूलार्थइतिभावः क्रमेणद्वयोरभा
वयोर्लक्षणमाह संसर्गाभावत्वमिति अन्योन्याभावेतिव्याप्तिवारणायान्योन्या
भावभिन्नेति ध्वंसादावतिव्याप्तिवारणायाभावपदंवमग्रेपि ताहात्म्येति उ॰
३५

विन्तु भावाभिन्नत्वस्याभावत्वेभावत्वरूपविशेषणज्ञान शून्यकालेघटोनास्ती
तिप्रतीत्यनापत्तिः एवमन्योन्याभावत्वस्याभावत्वागर्भस्याप्येवन्नाव्यक्तयाभा
वत्वस्यान्योन्याभावगर्भत्वेन्योन्याश्रयापत्तिः एवमभावत्वस्याभावाभिन्नत्वा
रूपत्वेभावोनभावइतिवाक्याच्छाब्दबोधानुपपत्तिश्च उद्देश्यतावच्छेदकवि
धेययोरैक्यादिति तस्मादखंडोपाधिरनुयोगिताविशेषोवाऽभावत्वमिति
वदंति नव्याः अभावत्वस्याखंडोपाधित्वेप्रमाणाभावः किंन्तुभावाभिन्नत्व
समवायसत्तासामानाधिकरण्यान्यतरसंबंधावच्छिन्नप्रतियोगिताकसत्ताभाव
रूपं नचपूर्वानुपस्थितमपिप्रकारः एवंचघटाभावपटाभावप्रतीतीनामभ
भावांशेऽनुगतमप्युपपद्यते नचविशेष्यतानवच्छेदकतास्थाभावव्यक्तेः
स्वरूपतएवप्रकारत्वोपगमात् अनुपलम्भना रूपप्रतियोगिज्ञानंविना

दि॰ न॰ ३४ योत्वत्स्वरूपसंबंधस्य च तत्र सत्वादत आह एवंचेति तत्तत्कालीनमिति घ
टाभाववद्भूतलमितिज्ञानकालीनमित्यर्थः तत्तद्भूतलादिकमिति यत्र
भूतले घटाभावबुद्धिस्तद्भूतलादिकमित्यर्थः तत्तद्भावानामिति यस्य य
स्याभावस्य बुद्धिस्तस्येत्यर्थः तथा च न तत्स्वरूपमात्रं संबंधः किंत्वीदृशस्वरू
पविशेष इति न पूर्वोक्तातिप्रसंग इति भावः नव्यास्तु वैशिष्ट्यपदार्थान्तर
मेव भूतले घटाभाववदिति प्रत्ययात् स्वरूपसंबंधानुपगमे वा भावाधिक
रणाद्यनुपलब्धिरूपभेदनानंत्यमात्रविषयकज्ञानादिकमादाय विनिगमनाविरह
इत्याहुः अभावः इत्यादिघटाद्यन्योन्याभाव इति इह च घटत्वादिना प्रति
योगितावच्छेदकं अननुगमात् किंतु तत्तद्घटशाब्दसंख्येव द्विप्रतियोगिता
कभेदस्य द्वित्वमेवेति ध्येयम् कालतोभावाभिन्नत्वमेव तथा बोध्य अत्रके गे॰ ३४

भूतले तस्य घटाभावस्येत्यर्थः अन्यथा घटाभावस्यानित्यत्वे देशान्तरेपि स
घटशून्यदेशेपीत्यर्थः घटत्वावच्छिन्नाभावस्यैकत्वादिति भावः वैशिष्ट्य
स्येति वैशिष्ट्यस्यानित्यत्वाभ्युपगमपक्ष इत्यादिः न चैवं घटानयनेन घट
वतिनवत्तु घटवति न घटाभावबुद्धिः घटवत्ताज्ञानस्य प्रतिबंधकस्य सत्वा
दिति वाच्यं घटवत्ताज्ञानविरहदशायां घटाभावबुद्धेर्जायमानायाः प्रमा
त्वप्रसंगादित्यत्र तात्पर्यात् ननु सिद्धांतिनोपि मते पाकेन रक्ते घटे श्याम
रूपसमवायस्य सत्वात् श्यामरूपवत्ताधीः प्रसंग इत्यत आह ममत्विति
द्वितीयं दूषणमाह वैशिष्ट्यस्येति ननु वैशिष्ट्यानंगीकारे घटाभावभूत
लयोः कः संबंधः स्वरूपमिति चेन्न यावन्ति घटशून्यतादशायामिव घट
वतादशायामपि भूतले घटाभावबुद्धिः स्वमते स्यात् घटाभावभूतल

टि॰ नं॰ ३३

रूपसमवायसत्वेनेनसंबंधेनतत्रकथं रूपाभावः संबंधसत्वस्यतेनेनसंबंधेन
संबंधिसत्वव्याप्यत्वादितिवाच्यं रूपनिरूपितत्वविशिष्टसमवायस्यैवरू
पसंबंधतयावायोः तदभावात् नचविशिष्टस्यानतिरिक्ततयाविशिष्टस
मवायोपिवायावस्तीतिवाच्यं रूपनिरूपितत्वविशिष्टसमवायत्वेनरूपि
ताधिकरणतायाएवरूपसंबंधत्वात्तस्यवायावभावात् पृथिव्यांगंधस्यसम
वायेनजलइतिप्रतीतेः समवायस्यनानात्वमितितन्नव्याः संबंधान
ंत्वतिरिक्तपदार्थतयेतिशेषः सिद्धोदितस्यभूतलादावित्यादिः य
द्वैशिष्ट्यमतिरिक्तमुररीकृत्यतेनदाननित्यमनित्यंवेतिविकल्पाद्येदूष
णमाह नश्येति ननुवैशिष्ट्यस्यतत्रसत्वेपिघटानयनदशायांतत्रघटा
भावाभावादेवनघटाभावबुद्धिरतआह घटाभावस्येति नतत्रघटवति

गो॰ ३३

कसंबंधविधया समवायसिद्धिः नच समवायस्थाने स्वरूपसंबंधं निवेश्य प्रका
र्यकारणभावः कल्पनीय इति वाच्यम् तथा सति यत्समवेतं कार्यमुत्पाद्यते
तत्समवायिकारणमिति स्यात् नच यत्संबद्धं कार्यमुत्पद्यते तत्तत्सम
वायिकारणमित्येवास्त्विति वाच्यम् कपालसंबद्धघटध्वंसं प्रति कपालस्य
समवायिकारणत्वप्रसंगादित्यपि इहत्वं सिद्धसाधनमिति प्रकृतसिद्ध्योः
स्वरूपसंबंध इति वेदान्तः परस्येति शेषः अर्थान्तरं चेति समवायसाधने प्रकृता
नां नैयायिकानामिति शेषः ननु तथापि समवायस्यैकत्वे किं मानमत आह
लाघवादिति तथाच यथा हि त्वादिजनकतयैकस्यैवो लाघवादेक एव सिद्ध्य
ति तथा समवायोपीत्यर्थः रूपवत्ता बुद्धीति रूपवत्ताबुद्धेः प्रमात्वप्रसंग इत्यर्थः
स्पर्शसमवायरूपसमवाययोरैक्यादिति भावः नत्र वायो रूपाभावादिति नच

सि॰ नं॰ ३२ बंधेन स्वाहितित्वाभावसामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभावात् न च प्रागभा
वे व्यभिचारः प्रागभावे सत्ताविरहादिति वाच्यं प्रागभाववृत्तिप्रतियोगिता
भिन्नप्रतियोगितायाः कार्यतावच्छेदकसंबंधत्वादिति वस्तुतस्तु सत्तावच्छि
न्नं प्रति तादात्म्येन द्रव्यत्वेन कारणताया जन्यतावच्छेदकतया सत्ताजातिसिद्धिः
तादृशकार्यकारणभावे मानाभाव इति तन्नात्मान्यसमवेतत्वसंबंधेन नीला
देर्नीलादावपि सत्त्वात् नवनीलाद्युत्पत्तिनिर्वाहणाय तादृशकार्यकारणभाव
स्यावश्यकत्वात् न चात्मान्यसमवेतत्वविशिष्टद्रव्यत्वसंबंधेन नीलादे
र्हेतुतयैव न तदापत्तिरिति वाच्यं तादृशसमवेतत्वद्रव्यत्वयोर्वैशिष्ट्यभावे
विनिगमनाविरहेण कारणताबाहुल्यापत्तेः कालिकसमवायोभयसंबंधस्य
कार्यतावच्छेदकतावच्छेदकत्वात्मनतायान्नीलान्यसाधारण्येऽपि तत्तिविरहादि ग्रं॰ ३२

त्वेवभेदसाधकत्वनियमात् नचसामान्यरूपेणविशेषाणांभेदकत्वंसंभ
वतिव्यभिचारात् ताहृशनियमानंगीकारेपरमाणत्वादीनानैकत्वादीनांनतत्वाक्ति
त्वेनैवपरमाणत्वेनतरभेदकत्वसंभवेनाविशेषस्यवैयर्थ्यप्रसंगात्तिदिक्‌ समवाय:
असंबंध: प्रतियोगितानुयोगितान्यतरसंबंधेनसमवायाभाव: समवायाभा
वयोर्जातिमत्त्वइति तदपेक्षयाचेति सत्तापेक्षयाचेत्यर्थ: सत्ताजातिद्र
द्रव्यंसत्गुण:सत्याद्यनुगतप्रतीत्यैवसिद्ध्यति अत्रनव्या: सदितिप्रतीतिविष
योभावत्वमेव अतएवसामान्यादिष्वपिसदितिव्यवहार: नत्वतिरिक्ताद्रव्या
दित्रिकवृत्तिनीलत्वाख्याजातिरिति तेनपरमपरंद्विविधंसामान्यपरंसत्तेतिवै
शेषिकविभागोनिर्युक्तिकत्वादत:नादेय इत्याहु: ध्वंसकारणतावच्छेदकत
यासत्ताजातिसिद्धे: यद्यप्रतियोगितासंबंधेनध्वंसोनास्तितत्रतनादात्म्यसंकार

वैतेषां व्याहतत्वात् आश्रयस्य च विशेषवत्तया व्याहतत्वेन विशेषत्वसंभा
द्वि॰ वादिति भावः ईश्वराकाशयोर्नित्यज्ञानशब्दाभ्यां व्याहतत्वेऽसंभवान्नतयोर्विशे
न॰ षत्वमित्याहुः नवीनास्तु विशेषे ऽतिरिक्तमानाभावः यत्रैव विशेषाणां स्व
६२ व्याहतिधर्मं विना व्याहतत्वं तथानिरूपणमयोग्यमाहुः तत्र घटपटक
पालपदे स्वयं व्यवयवपरेत्याह नित्यद्रव्यविशेषयोरिति समवायस्य
लक्षणमाह नित्यसंबंधत्वमिति संबंधस्याश्रसंबंधिभिन्नो ग्राह्यः तेनान
न्याभावादिस्वरूपसंबंधे नातिव्याप्तिः ननु समवायस्य संबंधत्वे किं प्रमा
णमित्याशंक्याह नत्वमाणंत्विति गुणक्रियादीत्यादिना जातिपरिग्रहः
संयोगादिति द्रव्ययोरेव संयोग इति नियमादिति भावः अत्र समवायसंबंधे
न घटत्वावच्छिन्नं प्रतियोगितात्मसंबंधेन तंतुत्वेनाहतुत्वान्कार्यतावच्छेद गो॰ ६२

त्यन्यत्र विस्तरः स्वतएवेति विशेषः स्वतोव्यावृत्तत्वं च स्वभिन्नलिंगाजन्य
स्वविशेष्यकस्वसजातीयभेदानुमितिविषयत्वं साजात्यं च पदार्थविभाज
कोपाधिरूपेणातेन घटादेस्तादात्म्येन व्यावृत्तत्वेपि विशेषस्य गुणादिरूपान्य
त्वेनेतरभेदानुमितिविषयत्वेपि द्रव्यादेरपि प्रमेयत्वादिना विशेषसजाती
यत्वेपि न क्षतिः नित्यद्रव्यवृत्तिरिति विशेषाणां स्यानेकत्वेनेन नत्वह
ण्यविवृत्तिप्रयोजनाभावात् तत्र विशेषव्यावृत्तौ नन्वेतत्परमाणुत्वादयो
व्यावर्तकाभविष्यन्ति किं विशेषेणेति चेन्न अव्याप्यवृत्तिधर्मस्य व्यावर्तकत्वाभा
वात् व्यावर्त्तकानवस्थायामनवस्थानात् ननु विशेषेष्वपि प्रसंग इति चे
न तस्य धर्मिग्राहकमानेन स्वतोव्यावृत्ततयैव सिद्धेः एवं च नित्यद्रव्ये
षु विशेषाः सिद्धाः लक्षणन्तु न विशेषवन्तः शेषपदार्थाणां विशेषेण

दि. नं. ३.

स्यमूर्त्तत्वस्य मूर्त्तत्वंविहायगगनवर्त्तमानस्य भूतत्वस्य च पृथिव्यादिचतुष्टयेस
त्वात् ननु सांकर्य्यस्य जातिबाधकत्वे किंमानमितिचेत् स्वसमानाधिकरण
स्वाभावसामानाधिकरण्योभयसंबंधेन जातिविशिष्टजातित्वावच्छेदेन समा
नाधिकरण्याभावप्रतियोगित्वाभावनियमस्य भंगप्रसंगएवेति तादृशनियम
स्य मानाभावान्न सांकर्य्यं जातिबाधकमिति नव्याः अनवस्थायां तु जाते जातिम
त्वे घटत्वादिनिखिलजातिघटकवैजात्यांगीकारेपि तद्वैजात्येन वैजात्यांतर
स्यैकव्यक्तित्वात् तथापि निखिलजातिघटकवैजात्येन तद्वैजात्येन तदाश्रयजात्यंत
र्गतं न वैजात्यमेवमग्रेपीत्यनवस्था बोध्या रूपहानिः निःसामान्यत्वग
र्भलक्षणाघातः रूपविशेषस्य जातिमत्वे रूपस्य स्वतो व्यावर्त्तकत्वस्य हानिः
न च जातिस्वीकारे तयैव व्यावर्त्तकत्वं वाच्यं सामान्याश्रयस्य सामान्यरूप ऊं. ३.

तत्राह एकमात्रेति व्यक्त्यभेदरूपबाधकसत्त्वादिति शेषः अनुगतायो
जातिकल्पिकाया अभावादिति भावः नन्वव्यक्त्यभेदरूपबाधकत्वमेवासि
द्धं निःसामान्यत्वे विशेषाणां नित्यत्वे च सति समवेतत्वस्य जातिलक्षलक्षणत्वा
दित्यतः संमतिमाह नचावोक्तमिति इत्यं किरणावल्यामुदयनाचार्यैरि
ति शेषः बहुष्वेकधर्मस्यैव सामान्यतया सर्वसिद्धत्वादेकव्यक्तौ जातिरन
पेक्षेति भावः व्यक्तेरभेदः एकव्यक्तिकत्वमाकाशादेर्जातित्वबाधकं तु
ल्यत्वं तुल्यव्यक्तिवृत्तित्वं घटत्वकलशत्वादीनां जातेर्नाभेदे वस्तुतस्तु तु
ल्यत्वं तुल्यव्यक्तिवृत्तित्वं स्वाभिन्नजातिसमनियतत्वमिति यावत् तच्च जा
तित्वबाधकमेवेति ध्येयम् संकरः परस्परात्यन्ताभावसमानाधिकरणयो
र्धर्मयोरेकत्र समावेशः भूतत्वे जातित्वे भूतत्वं विहाय मनसि वर्तमान

दि॰ नं॰ २९ ति सामान्यं तल्लक्षणं त्विति लक्षणप्रयोजनं त्वितरभेदस्य व्यवहारस्य वा
सिद्धिः सामान्यमितरेभ्यो भिद्यते सामान्यमिति व्यवहारविषयो वा नित्य
त्वे सत्यनेकसमवेतत्वात् यन्नैवं तन्नैवं यथा द्रव्यमिति एवं लक्षणं तद्
युक्तं अनेकात्वमेकाभिन्नत्वं जलपरमाणुरूपादावतिव्याप्तिकरणाय यो नो
यो विशिष्टाभागसमवेतत्वघटकसमवायफलमाह नित्यत्वे सत्यनेकवृ
त्तित्वमिति नचैवं नित्यसंयोगेतिव्याप्तिरिति वाच्यं तस्य निरस्तत्वात् कु
तो नित्यासत्त्वेन द्रव्यानिरूपितसंयोगानिरूपकार्यतावच्छेदककोटिजन्य
त्वनिवेशगौरवात् नित्यसंयोगांगीकारे नये संयोगत्वस्य नित्यवृत्तित्वेन
कार्यत्वानवच्छेदकत्वात् लघुतया नित्यविभागासिद्ध्यापत्तेश्च नन्वाकाश
त्वरूपजातावव्याप्तिस्तस्यानेकसमवेतत्वाभावादित्याशंक्यालक्ष्यत्वेनो उं॰ २९

धर्मेशाहाः ससमसमनुचिताः तेनसर्वैकतयावगतंविंशुत्तिगुणाइहव्यवहृताः
ननुवत्तविंशुतौकिंनामगुणत्वंनचजातिविशेषस्तत्रप्रमाणाभावादिति
तत्राह नचेतिनेऽगुणत्वविपर्ययः अथगुणानिद्रव्यण्यवसमवेतत्वान इति द्रव्य
कर्मभिन्नेसामान्यवतियाकारणतासाकिंविद्रमोवक्षेवक्षेघाकारणत्वादि
त्यनुमानेनगुणत्वजातौप्रमाणमितिभावः पतन्नेनत्वंतत्रैवस्फुटीभविष्यति
कर्माणि प्रत्यक्षसिद्धानि चलनाकारानुगतप्रत्ययवेद्यत्वर्थः अथिकतये
तिकर्मविभागकोपार्थ्यमणनादिभिः मूलेगमनादेवेति अथैवमुत्क्षेप
णादीनांगमनादेवलाभेऽनेपणत्वादिभिस्तेषांविभागोऽनुचितः नहिउत्क्षे
पणादौगमनत्वंनानुभाविकम् उऽर्ध्वमधप्रप्राप्तिमलोकादाहमुग्गच्छमधो
गच्छतीतिप्रत्ययादितिचेन्न स्वातेत्रेकस्यमनुमेतियोगपपपयेनयोगानहत्वादि

दि॰
न॰
२८

ऽप्येषां पार्थिवीकर्मप्रतीतिरिति भावः ननु प्रतीतेर्भ्रान्तत्वं तत्रैव वक्तव्यं यत्रोत्त
रकाले बाधज्ञानं प्रकृते च तमसो न चलतीत्युत्तरकाले बाधज्ञानाभावात्कथं प्रती
तेर्भ्रान्तत्वमित्यतो हेत्वन्तरमाह तम इति अवयवादीत्यादिना उत्पत्तिध्वंसप
रिग्रहः यत्त्वारोपितं नीलरूपं तम इति कन्दलीकारमतम् तत्र इहाधिकार
इति प्रतीतेरप्यविभ्रमत्वापत्तेः तमो नीलं न तु नीलिमेति प्रत्ययाच्च ननु तम
सो नातिरिक्तत्वेऽपि सवर्णाप्यातिरिक्तद्रव्यस्य सत्त्वान्नवत्वव्याघातं लक्षणस्य
एवेत्यत आह सवर्णस्येति वक्ष्यत इति तेजोनिरूपणावसर इति शेषः गु
णाः कथ्यन्त इति रूपरसगन्धस्पर्शाः संख्यापरिमाणपृथक्त्वसंयोगविभागौ
परत्वापरत्वबुद्धयः सुखदुःखेच्छाद्वेषप्रयत्नाश्च गुणा इति विभागसूत्रे तत्र ग्रं॰
दशकं होक्ताः वक्षाहेण सूत्रस्यावशाह नग कान्वडवत्वस्नेहसंख्याभथमो २८

परविभागवत् प्रसिद्धद्रव्यवैधर्म्यान्न वक्तव्यो भेदस्तमसोर्हतीति ननु तमसो द्रव्यत्वे
आलोकानिरपेक्षेणचक्षुरिंद्रियेणाग्रहो न स्यात् द्रव्यग्रहे आलोकसापेक्षत्व
त्वमिंद्रियस्य हेतुत्वादित्यत आह तमआलोकेति तमःप्रत्यक्षे वेत्यर्थः न चा
वत्तमोभिन्नद्रव्यचाक्षुषत्वावच्छिन्नं प्रत्येव संयोगसंबंधेनालोकत्वेन कारणत्वाव
धारणादिति भावः आवश्यकतेजोभावेनेति प्रकाशमहत्त्वोद्भूतानभिभूतरूपवत्ते
जस्त्वावच्छिन्नाभावेनेत्यर्थः अंधकाराभावव्यवनेजः किंनस्यादितितुन्नसम्यकु
ड्यस्य शोभात्वरूपवद्धेरत्र पपन्नेरितिसूचनायावश्यकपदं उपपन्नो तमोविव
हारोपपत्तौ ननु तमसत्वेऽभावत्वे रूपवत्ताप्रतीतिः कथं अभावे रूपाभावा
दित्यत आह रूपवत्त्वेति ननु रूपवत्त्वप्रतीतिर्भ्रांतत्वेऽपि चलतीति प्रत्ययासिद्धिक
मेवत्याह न नातमसि द्रव्यत्वसंप्रतीत्यत आह कर्मवत्ताप्रतीतिरप्येति नहि द्र

दि॰ न॰ २०

तं तेन जन्यमात्रस्य कालिकसंबंधेन कर्मवत्वेपि न व्यभिचारः नत्वस्व स्वरूपाति
द्धिः वलनित्वच्छायेति प्रतीत्या कर्मवत्वासिद्धेः ननु सः कृष्ण इत्येषुंतभावानि
राकृतत्वे तद्दीत्यादिना गंधेति गंधाभावस्य हेतुत्वोक्तौ पटगतगंधप्रतियो
गिकाभावमादाय घटे व्यभिचारेण सूत्यत्वमुक्तं हेतुस्य प्रतियोगिव्याधि
करणात् समवायसंबंधावच्छिन्नप्रतियोगिताकोपि बोध्यः तेन नोत्पत्तिका
लीनसंयोगसंबंधावच्छिन्नगंधाभाववति वायौ घटे व्यभिचारः नीलरूपेति
अनुगतत्वेनैकेनैव नीलरूपेण हेतुना जलाद्यष्टभेदासिद्धेः स्नेहाभावमात्र
रूपाभावादीनामननुगतानां न हेतुत्वयोग्यत्वात् जलादिकमित्यादिना
तेजः प्रभृतिद्रव्यसंग्रहः तथा च नवस्वद्रव्येष्वंतर्भावासंभवेणापरिशेष श्री
ण तमसोधिकद्रव्यत्वसिद्धिरिति भावः तदुक्तं तमः खलु चलं नीलं परा २०

गगनादिवृत्तित्वकल्पनेपिमूर्तत्वेनसांकर्यवारणायमनोवृत्तित्वावच्छेदक
त्वादितिवाच्यं तथाचसतिमूर्तत्वजात्याद्रव्यत्वस्यन्यूनदेशवृत्तित्वापत्ति
रिति ननुद्रव्यमद्रव्यस्यतमसः सत्वादव्याप्तिरित्यव्याप्तिरित्यभिप्रायेण
मीमांसकःशंकते नन्विति ननुतमसिमानाभावादेवनाव्याप्तिरित्याशंक्य
तमसःसाधकंप्रत्यक्षप्रमाणमाह तद्धीति तमोहीत्यर्थः प्रत्यक्षेण चक्षु
रिंद्रियेण ननुतमसःसिद्धावपितस्यद्रव्यत्वेकिंमानमित्याशंक्यानुमा
नंप्रमाणमाह तस्येति तमसइत्यर्थः चकारोद्रव्यभिन्नत्वेनान्वेति नचा
वतमोद्रव्यंरूपवत्वादित्यनुमानेनतमसोद्रव्यत्वेप्रमाणसूचितं इत्युपल
क्षणं परत्वापरत्वाश्रयत्वादित्यपिबोध्यं इदंतमःपरमिदमपरमितिप्रती
तेः हेत्वंतरमाह कर्मवत्वादिति कर्मवत्वंचसमवायसंबंधेनावच्छि

दि॰
नं॰
२८

कविनश्येवपाठः अत्रयद्यपिगुणत्वेनानन्यथासिद्धिः संभवतिनथापिमादानामसंबं
धधर्मेवाधेसत्येवान्नमितेः परंपरासंबंधविषयत्वमितिभावः इदमुपलक्षणं
द्रव्यवृत्तिद्रव्यांतरानुत्पत्तौसमवायेनद्रव्यस्यप्रतिबंधकत्वंकल्पनीयमितिप्र
तिबंधकतावच्छेदकतयाद्रव्यत्वसिद्धिः प्रतिबध्यतावच्छेदकंचपृथिव्यादिवृत्ति
द्रव्यमात्रवृत्तिभूतत्वमेव निरवयवाहृतकत्वात् भूतत्वस्यप्रतिबंधकतावच्छे
दकत्वेतुमूर्तत्वस्यतत्स्थानमादायविनिगमनाविरहापत्तिः द्रव्यत्वस्यप्र
तिबंधकतावच्छेदकत्वेतुधर्मिग्राहकमानसिद्धत्वेनतस्यगगनादिवृत्ति
त्वेमानाभावइतिवाच्यं भूतत्वेनतत्सहवृत्तिकत्वापत्त्याविनिगमनाविर
हेणगगनादिपवृत्तित्वाभ्युपगमात् नचभूतत्वेनतत्सख्यातिवृत्तित्ववा
रणायमूर्तोवृत्तित्वमेवद्रव्यत्वेकल्प्यतां गगनादिवृत्तित्वकल्पनेगौरवात्

उं॰
२८

कालिकत्वाच्च समवायेन नीलं प्रतित्वाश्रयसमवेतेन द्रव्यत्वसंबंधेन नी
लं प्रति समवेतन कारणाभूर्वेत्तराहित्वसंबंधेन कार्यत्वस्य कार्यतावच्छेद
कत्वगौरवात् कालिकसंबंधेन घटत्वादिकमादाय विनिगमनाविरहाच्चेत्य
त आह संयोगस्येति अत्र च रूपादिगुणानां सकलद्रव्यसाधारण्याभावेन द्रव
व्यत्वव्याप्यपरिमाणः सकलद्रव्यवृत्तिसंख्यादित्रयस्य च गगनादिवृत्तित्वा
दित्रयस्य नित्यत्वात् न च संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन समवायिकारणत्वे
मानाभावः तत्तद्विसमवेतसत्त्वसामान्यं प्रति तत्तद्व्यक्तित्वेन समवायिकारणत्व
स्यावश्यकत्वात् तद्व्यादासंभवादिति वाच्यं कार्यमात्रवृत्तिजातेः कार्यतावच्छे
दकत्वनियमेन तादृशकारणत्वस्यावश्यकत्वात् अतिसमवेतयोगांगीकारे मन
लाघवेनाह विभागस्येति द्रव्यत्वसिद्धेः जातिरूपद्रव्यत्वसिद्धेः वा

व्योमआकाशइति देहीविशिष्टार्थवाचकेदेहिशब्दे देहावयवानामुपस्थितेरा
ह देहीआत्मेति अथैषामस्य देहिनामध्येअन्तर्भावितत्वात्कथंद्रव्यत्वमिति चेन्न
हत्रा भूत्वावैशान्यायेनेश्वरस्यशरीरमिति संसारेदेहएवशान्तिव्रतीरमिन्य
न्य इतएवचात्वरसादात्मेति पृथिव्यप्तेजोवाय्वात्मानइतिपंचैवद्रव्याणि व्यो
मादेरीश्वरात्मन्येवान्तर्भावात् मनसश्चासमवेतभूतेंतर्भावादिति नवीनास्त्वा
हुः तन्मतंनिराकर्तुंसंख्याबोधकपदस्वारस्येनार्थमाह एतानिनवेति व्योम्न
श्चब्रह्माश्रयतयासिद्धिः नचभगवतएवशब्दाश्रयत्वं प्रत्येकंजीवमादाय
विनिगमनाविरहात् नचजीवानामाश्रयत्वेशब्दवानहमितिप्रतीत्यापत्तिः अ
हमेवदयोगात्वस्यैवकसनात् कालदिशोरूपत्वेपिकालेघटः पूर्वस्यांदि
शिघटइत्याद्यनुगताकारप्रत्ययात् मनसश्चासमवेतभूतत्वेपार्थिवादिपरमाण

दि॰ न॰ ९५ नादाय्यवितिगमनाविरहइत्याशयः अपिकमण्येवित्तोभविष्यतिसंयोगनूले
द्रव्यालीति द्रव्यपदंद्रव्यत्वरूपजातिविशिष्टार्थकं ननुगुणाश्रयत्वादिविशि
ष्टार्थकंकुतोनवात् मुक्तावल्या किंप्रमाणमिति किंप्राहः प्रत्यनन्तुद्रव्यद्रव्य
मितिरनुगतप्रतीतिरेवजातिसाधकाभविष्यतीत्यतआह नहीतितत्र द्रव्यत्व
जातौ सत्तेति तथाचपामराणांघटादिषुद्रव्यत्वज्ञानाभावेनसकलद्रव्यसा
धारणाद्रव्यत्वजातिसिद्धिर्नभविष्यतीतिभावः कार्यमिति कार्यत्वंप्रागभाव
प्रतियोगित्वं नवध्वंससाधारणम् सत्वेनाविशेषणीयत्वात् अत्रचकार्यस्य
समवायः प्रत्यासत्तिः कारणस्यतादात्म्यंयत्रचसमवायेनकार्यंतत्रतादात्म्य
नद्रव्यमितिनियमात् ननुजन्य सत्वरूकार्यत्वावच्छिन्नंप्रतितादात्म्येनद्रव्य
त्वेनकारणत्वेमानाभावः नवनीलेनीलोत्पत्तिवारणायतस्याहेतुत्वमावश्य उं॰ २५

दिन: २५ विभागंव्याचष्टइति तस्मात्तात्पर्यं पर्यायवाचकत्वज्ञानोपयोगिपदार्थमात्रेति रू
पणपरत्वात् एवमधिकरणत्वमपि तस्यसंयोगादिरूपत्वे बदरकुंडसंयोग
स्यैवहेतुत्वेनकुंडेबदरमितिवदकुंडमित्यपिप्रयोगः स्यात् एवंप्रतियोगित्व
मपीत्याहुः साहचर्यलक्षणां लक्षयोजयति यथेति स्वेनशब्दः श्लोकव्याख्या
समाप्तिद्योतकः द्रव्याणिविभजनेदितेति स्त्रियांक्तिन्निति सूत्रविहितक्तिप्र
त्ययान्तदितिशब्दस्यलवनवाचकत्वात् दितिपदस्यप्रकृतोपयोगिनमर्थमा
ह दितिः पृथिवी अग्रशब्दस्यअग्रमनन्तजिन्यादिपाणिनीयसूत्रे शब्दपरत्वा
दाह अग्रभुजलानीति प्रतापस्यापितेजः शब्दवाच्यत्वात्प्रकृतेतेजः पदार्थंद
र्शयति तेजोवह्निरिति वह्न्यादिरित्यर्थः देवविशेषोपिमरुच्छब्दवाच्यत्वात्प्र
कृतोपयोगिनमर्थमाह मरुद्वायुरिति व्योमशब्दस्यैवदेवप्रसिद्धिप्रयोगादाह उं. २५

न्तःपदार्थेष्वनित्तदपिनिश्चाकरोति सादृश्यमस्तीति नक्लिन्नत्वेसतीति स्वंव

सादृश्यनिरूपकेलिङ्गामिवारणाय अनुयोगित्वसंबंधविवक्षणेन्नदेयमे

व नक्षत्वभूयोधर्मवत्वमिति न[illegible]रूपेनविद्यमानायेभूयसोधर्मोल

क्षणमिवसमर्थः नन्विदंगगनंगगनाकारंसागरः सागरोपमः रामरावणयोर्यु

द्धंरामरावणयोरिवेत्यादावव्याप्तमितिचेन्न नह्यत्रधर्मसाम्यस्यतत्रविवक्षित

त्वात् युगभेदविवक्षयाभेदसत्वाद्वा अतएवयुगभेदविवक्षायामिहोपमा

लंकारोनन्वयालंकारश्चक्रमालंकारिकैः सादृश्यघटकधर्मश्चक्व

विज्ञानिरूपोयथाघटसदृशःपटइत्यादौ क्वचिद्वाधिरूपोयथागोसंत

थावत्वमपीत्यादौ यथावचंद्रसदृशंमुखमित्यादौआह्लादकत्वादि अतिरि

क्तकसनेगौरवादिति नव्यास्तुसादृश्यमतिरिक्तमेव नचातिरिक्तत्वेपदार्थे

मा०
यत्रासिद्धिवारणायेसाध्येदाहानुकूलेतिवह्निव्याप्येकेंधनसंयोगमादायाहह
वदात्मसंयोगमादायवातदारणायवह्निहेतिवह्निनिष्ठोलक्ष्यश्रमादायनदार
णायांतोह्नियतेतिवेन्न विपक्षेबाधकतर्काविरहेणास्यानुमानस्याप्रयोजक
त्वात् केचित्तुवह्निःप्रतिनिरूपणफूत्कारसंयोगादीनांतृणफूत्कारसंयोगत्वादिरू
पेणकारणतायांव्यभिचारेणासंभवादतिरिक्तशक्तिसिद्धिः नचतृणफूत्कार
योरन्योन्याभिमन्यनयोर्मणितरणिकिरणयोश्चसंबंधस्यजन्यतावच्छेदकवैजात्य
त्रयवत्सनामघेदृतन्नसंबंधानामेकशक्तिमत्त्वेनकारणत्वकल्पनायामपव
लवत्वेनन्याय्यत्वादितिवाच्यः नच तत्तत्संबंधसाधारणैकजातेरेवाभ्युपगमा
त् नचयोगिद्धतिजातेर्योग्यत्वापत्तिरितिवाच्यं दोषविशेषेणशक्तेरिवास्या
गत्वकल्पनात् नचनोपनत्वादिनासंकरः तस्यादोषत्वात् अन्यतमत्वेनका

सिन. २२

समवधानकालेपितिष्ठतीतिनव्यभिचारइतिभावः अथस्मरणादित्यत्रलौकिकदाहप्र
मितेजकस्यवह्नित्वनास्तित्वेत्र नस्याननुगतत्वात् तावदभावकूटविशिष्टम
णभावस्यानुगतत्वात् अवेदंबोध्यं अभावीयविशेषणतासंबंधेनदाहत्वाव
च्छिन्नप्रतिडहे अपमादेअपकविशेषणतान्यतरसंबंधावच्छिन्नप्रतियोगिकाऽ
नोतनडतेजकाभावानांसामानाधिकरण्यंयद्वैशिष्ट्यंतदवच्छिन्नस्यमणा
देदैशिकविशेषणतासंबंधावच्छिन्नप्रतियोगिताकाभावस्याभावीयविशेषण
तासंबंधेनदाहत्वमितिमिति एतेनसंयोगसंबंधावच्छिन्नप्रतियोगिताकमण्य
भावस्यतत्संयुक्तेपिसत्वात्दाहापत्तिरितिपरास्तं नन्वनुमानमेवकिमत्रप्र
माणं नत्वाहि वह्निर्दाहानुकूलादृष्टातीन्द्रियधर्मसमवायीदाहजनकत्वा
दात्मवदिति वह्निव्याप्यैकैकत्वमादायभग्नकपालस्थवह्निनिष्ठानुद्भूतरूप

डां. २२

तिव्याप्तिः स्वप्रागभावप्रतियोगिनियतदेशवैशिष्टेन तादात्म्यातिरिक्तसंबंधा
वच्छिन्नायाकारणतानतदाश्रयीभूतोयोभावभिन्नोयंतताभावस्तत्प्रतियोगित्वस्य
विवक्षितत्वात् कारणताविशेषोपादानाद्वस्वांतताभावप्रसक्तेस्वस्यप्रतिबंध
कत्वापत्तिः परामर्शविषयस्यतादात्म्यसंबंधेनैवप्रतिबंधेहेतुत्वात् ननुवह्निम
ण्यभावयोर्द्वयोर्हेतुतापेक्षयातिरिक्तशक्तेरेकस्याएवहेतुतायालाघवादित्य
तआह अनेनैवेति दाहादिकंप्रतिमण्यभावादेर्हेतुत्वकल्पनेनैवेत्यर्थः सा
मंजस्य मणिसमवधानदशायांदाहवारणे प्रागभावेमानाभावाद्दाहध्वंसे
ति इदमुपलक्षणं प्रतियोगिध्वंसयोः शक्तिनाशमण्योःशक्तिमण्यपसारण
योस्वकार्यकारभावकल्पनापिस्यादित्यपिबोध्यं उत्तेजकाभावेति तथाचके
वलंमणिप्रतिबंधकः किंतु उत्तेजकाभावविशिष्टः तदभावश्चोत्तेजक

भावविशिष्टवह्नित्वादिनैव हेतुताकसम्भवितमितिभावः दाहादिकमित्यादिय
दिन. २९ देनवह्नेः संग्रहः मणिसत्त्वेवह्नेरप्यसत्वेन तथाविधमणिरूपप्रतिबंधकसद्भावान्न
दाहवह्नीतिभावः ननुयदाकदाचिन्मण्यभावविशिष्टादह्नेर्दाहापत्तिः कार
णतावच्छेदकावलीदकारणसत्त्वस्यैवकार्योत्पत्तिनियामकत्वात् मण्यभावत्ववि
शिष्टवह्नित्वंवह्निविशिष्टमण्यभावत्वंवा कारणतावच्छेदकमित्यत्रविशेषण
विशेष्यभावेविनिगमनाविरहेनगुरुभूतकार्यकारणभावद्वयापत्तिश्चेत्यतआ
ह मण्याद्यभावादेरिति तथाचप्रतिबंधकत्वेनकार्यनकूलधर्मविघट
कत्वं बाधज्ञानस्यानुमितिप्रतिबंधकत्वाभावापत्तेः किंतुकारणीभूताभाव
नव ९ प्रतियोगित्वं नह्यमण्यभावस्यहेतुत्वेनुपपद्यते नन्वतिरिक्तशक्तिसत्त्वइतिभावः
ननुप्रतिबंधकत्वस्यैतादृशत्वेकारणीभूतवह्निरूपाभावप्रतियोगिवह्न्यभावे ठो. २९

त्साहचर्यं हि हेतौ सामान्येऽपीति सामान्येन रहितत्वे सतीति सामान्यरहितत्वादित्यर्थः
तेन सामान्यत्वेन व्यभिचारः व्यतिरेकित्वे सतीति विशेषणेन प्रमेयत्वादौ व्यभि
चारः भावत्वे घटत्वादिषट्कान्यतमत्वरूपे हेतुमति साध्यस्य सत्त्वान्न व्यभिचार इति
तथ्येति यदि साहचर्यं द्रव्यादावन्तर्भूतं तन्न दोषः द्रव्यादेः सामान्यरहितत्वेन यथा गोत्वेनि
त्यं तथा घटत्वमित्यबाधितप्रतीतिर्न स्यादित्यर्थः अभावे तु भावमाशङ्क्य निराचष्टे
नापीति यद्यप्यतिरिक्ताभावमनङ्गीकुर्वतः प्राभाकरस्य मते भावे तु भावविलक्षण
संभवति तथापि स्वमतमभ्युपेत्येदं निराकृतमिति भावः सत्त्वेन भावत्वेन प्रती
यमानत्वात् प्रमीयमाणत्वात् मणिसमवधानकालीनवह्निना दाहवारणाय
प्राभाकरेण साधितां शक्तिं दूषयति मण्याद्यभावेति अतिरिक्तशक्तिकल्पना हि वी
क्षणनाशनाशनाशकभावकभावकसनाचापेत्यलाघवाद्दाहत्वावच्छिन्नं प्रतिमण